# TERM-1 EXAMINATION (2026-27)
## SANSKRIT (119) SET -1

Class :VIII Duration: 3 Hrs
Date :11.09.2026 Max. Marks: 80
Admission No.: Roll No.:

---

सामान्यनिर्देशाः

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 पृष्ठानि मुद्रितानि सन्ति ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 16 प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति ।
4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्व प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

---

प्रश्नपत्रस्वरूपम् -

| | |
|---|---|
| 'क' भागः अपठितावबोधनम् | 10 अङ्काः |
| 'ख' भागः : रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' भागः : अनुप्रयुक्तव्याकरणम् | 24 अङ्काः |
| 'घ' भागः : पठितावबोधनम् | 31 अङ्काः |

---

खण्ड 'क' भागः

अपठितावबोधनम् **10** अङ्काः

प्रश्न **01** गद्यांशं ध्यानेन पठित्वा प्रश्नान् उत्तरत – (गद्यांश को ध्यान से पढ़कर प्रश्नों के उत्तर दीजिए।)

(Read the paragraph carefully and answer the questions.)

एकः बालकः ईश्वरस्य भक्तः आसीत्। एकदा ईश्वरः स्वप्ने तम् कथयत्- 'त्वं तु मम भक्तः असि, अतः मम एकं कार्यं करोतु । तव गृहात् बहिः एका शिला अस्ति। तां शिलां तस्मात् स्थानात् अपसारय।' तस्य बालकस्य ईश्वरे दृढविश्वासः आसीत्। अतः अविचार्य एव बालकः ईश्वरस्य आदेशम् अमन्यत। प्रातःकाले उत्थाय सः विशालां शिलाम् अपश्यत्। ईश्वरं स्मृत्वा बालकः कार्यम् अकरोत्। तदा तं दृष्ट्वा जनाः अकथयन्- "अस्याः शिलायाः अपसारणम् असम्भवम्, अतः वृथा परिश्रमं न करोतु ।" परन्तु सः बालकः तस्मिन् कार्ये संलग्नः अभवत्। एतत् कार्यं कुर्वन् बालस्य शरीरं बलवत् अभवत्, किन्तु सः निराशः अभवत्। सः रात्रौ स्वप्ने पुनः ईश्वरम् अकथयत्- मम् श्रमः तु व्यर्थः अभवत्। शिला तु तत्र एव अस्ति। प्रसन्नः ईश्वरः बालकम् अवदत्- संसारेऽस्मिन् किम् अपि कार्यं निष्फलं न भवति। पश्य, भवान् निर्बलः आसीत् इदानीं भवान् बलवान् अभवत्। नरः जीवने यदा कदा परोक्षः लाभः प्राप्नोति।

प्रश्नाः-

(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) (1X2=2)

(i) बालकस्य ईश्वरे कीदृशः विश्वासः आसीत्?

(ii) शिला कुत्र आसीत्?

(iii) रात्रौ बालकः स्वप्ने कं अकथयत्?

(ब) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) (2X2=4)

(i) ईश्वरः बालकं किं कार्यं कर्तुम् आदेशितवान्?

(ii) ईश्वरः बालकाय किं उपदेशम् अददात्?

(iii) शिलाम् अपसारयितुं प्रयतमानस्य बालस्य शरीरे कः परिवर्तनः अभवत्?

(स) भाषिककार्यम्। (केवलं प्रश्नत्रयम्) (1X3=3)

(i) 'अभवत्' इति क्रियापदस्य कर्तृपदं किम्?

(क) ईश्वरः (ख) शरीरम्

(ग) बालकः (घ) जनाः

(ii) 'प्रातःकाले' इति पदस्य किं विपरीतपदम् गद्यांशे प्रयुक्तम्?

(क) दिवा (ख) रात्रौ

(ग) सायम् (घ) मध्याह्ने

(iii) 'जनाः अकथयन्' इत्यत्र क्रियापदं किम्?

(क) जनाः (ख) तदा

(ग) अकथयन् (घ) दृष्ट्वा

(iv) ''आज्ञा'' इति पदस्य समानार्थकपदं गद्यांशे प्रयुक्तम्?

(क) लाभः (ख) कार्यम्

(ग) आदेशम् (घ) विश्वासः

(द) अस्य गद्यांशस्य उचितं शीर्षकं लिखत। (1X1=1)

## खण्ड ख

## रचनात्मक कार्यं (15 अंकात्मक:)

प्रश्न **02** मञ्जूषायाः समुचितानि पदानि चित्वा पत्रं पूरयित्वा उत्तर पुस्तिकयां पुनः लिखत - **(½X10 =5)**

निम्नलिखित पत्र को मंजूषा से उचित शब्द को चुनकर पूर्ण कीजिए और अपनी उत्तरपुस्तिका में पुनः लिखें

Complete the following letter by choosing the appropriate word from the box and rewrite it in your answer book.

(i) ----------
कानपुरम्
दिनाङ्कः ---------

आदरणीय: (ii) -----------
सादरं (iii) --------------

अत्र कुशलं (iv) ----------। अद्य मम वार्षिकपरीक्षायाः (v) ------------- आगतः। अस्यां परीक्षायाम् अहं (vi) ---------- स्थानं प्राप्तवान्। समाचारपत्रे मम (vii) ---------- अपि प्रकाशितम्। मम् प्रधानाचार्यः प्रार्थना सभायां मह्यं (viii) ---------- दत्वा सम्मानं कृतवान् । अहं शीघ्रमेव (ix) ------------- आगमिष्यामि। ज्येष्ठेभ्य: चरण वन्दनं कनिष्ठेभ्य: च स्नेहः।

भवतां प्रिय पुत्रः
(x) -----------

मञ्जूषा

स्वर्णपदकं, प्रथमं, गृहम्, चित्रम्, प्रतापः, तत्रास्तु, पिताश्री, परिणामः, नमो नमः, छात्रवासः

प्रश्न **03** 'दीपावली' इति विषयमधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन एकं अनुच्छेदं लिखत-
'दीपावली' (दशहरा) विषय पर बॉक्स में दिए गए शब्दों का प्रयोग करते हुए संस्कृत में एक अनुच्छेद लिखें: **1X5=5**
Write a paragraph in Sanskrit on the topic 'Deepawali' using the words given in the box:

| मञ्जूषा | वाक्यानि |
|---|---|
| दीपावली, प्रमुख पर्वः वर्तते, अस्मिन् दिने श्रीरामः, दीपमालाः प्राज्वालयन्, दीपाप्रकाशेन अयोध्यानगरी, स्फोटकानि स्फोटयन्ति, अयोध्यावासिनः श्रीरामस्य स्वागताय, लक्ष्मीपूजनं , कुर्वन्ति, जनाः, अस्मिन् दिने जनाः, हिन्दूनां, अयोध्यां प्रत्यागच्छत् , प्रकाशमाना अभवत्, गृहाणि सज्जीकुर्वन्ति, बालकाः, | 1. --------------------------------------------\|<br>2. --------------------------------------------\|<br>3. --------------------------------------------\|<br>4. --------------------------------------------\|<br>5. --------------------------------------------\| |

अथवा

पञ्चसंस्कृतवाक्येषु मञ्जूषापदसहायतया अधः दत्तं चित्रवर्णनं कुरुत।
(पाँच संस्कृत वाक्यों में मञ्जूषा के शब्दों की सहायता से नीचे दिए चित्र का वर्णन कीजिए।
Describe the following picture in five Sanskrit sentences with the help of words given in the box.)



| मञ्जूषा |
|---|
| एतत् चित्रं, परीक्षां यच्छन्ति, विद्यालयस्य अस्ति सुन्दरम् अस्ति,अस्मिन् चित्रे, बालिकाः, चित्रं, छात्राः उपतिष्ठन्ति, प्रश्नपत्रं पश्यति, आरक्षीनिरीक्षकः, वृक्षाः सन्ति, |
| 1. --------------------------------------------\|<br>2. --------------------------------------------\|<br>3. --------------------------------------------\|<br>4. --------------------------------------------\|<br>5. --------------------------------------------\| |

प्रश्न 04 अध: एका कथा लिखिता अस्ति। तस्यां कानिचित् पदानि रिक्तानि सन्ति। मञ्जूषायां दत्तानि पदानि सहायतायै तानि पूरयित्वा कथां पुनः उत्तरपुस्तिकायां लिखत। ½X10 =5
(नीचे एक कहानी दी गई है। उसमें कुछ पद रिक्त हैं। मञ्जूषा के पदों की सहायता से उन्हें पूर्ण करके कहानी को पुनः उत्तर-पुस्तिका में लिखिए।
An inspiring memory is given below. Some blanks are there. Complete those blanks and re-write the memory in answer sheet. Words are given in the box for help.)

प्राचीनकाले एकस्मिन् (1) _________ अनेकाः (2) _________ अध्ययनं कुर्वन्ति स्म। तेषां (3) _________ अतीव दयालुः आसीत्। सः सर्वान् (4) _________ समये उत्तिष्ठितुम् आदेशं ददाति स्म। अध्ययनस्य अनन्तरं सर्वे छात्राः (5) _________ सिञ्चन्ति स्म। ते विद्यालयस्य (6) _________ अपि कुर्वन्ति स्म। एतत् दृष्ट्वा गुरुः अतीव (7) _________ अभवत्। सः शिष्यान् अवदत्— "(8) _________ विना कस्यापि कार्यस्य (9) _________ न भवति।" सर्वे छात्राः गुरोः वचनानि श्रुत्वा जीवने परिश्रमस्य महत्त्वम् अवगत्य (10) _________ प्राप्तवन्तः।

मञ्जूषा

गुरुकुले, गुरुः, शिष्याः, प्रतिदिनम्, वृक्षान्, जलम्, सेवाम्, प्रसन्नः, परिश्रमस्य, सफलताम्

अथवा

निम्नलिखितम् संवादं मञ्जूषाप्रदत्तपङ्क्तिसहायतया पूरयित्वा पुनः लिखत। 1X10 =5

(निम्नलिखित संवाद को मज्जूषा में दिए गए पंक्तियों की सहायता से पूरा करके पुनः लिखिए।

Complete the following dialogue with the help of sentences given in the box and re-write the same.)

अमितः - भो मित्र! तव हस्ते किम् अस्ति ?

सुमितः - (1) ------------------------------

अमितः - किं त्वम् एकः शरचालकः धनुर्धरः असि?

सुमितः - (2) ------------------------------

अमितः - तर्हि किं त्वम् आखेटकम् कर्तुं गच्छसि ?

सुमितः - (3) ------------------------------

अमितः - तर्हि, धनुं स्वीकृत्य कुत्र गच्छसि ?

सुमितः - (4) ------------------------------

अमितः - उत्तमं मित्र !, प्रतियोगिता कदा अस्ति ?

सुमितः - (5) ------------------------------

अमितः - अस्तु, भवान अभ्यासं करोतु अहं गृहं गच्छामि ।

सुमितः - अस्तु, श्वः विद्यालये मिलामः ।

अमितः - अस्तु, पुनर्मिलामः ।

मञ्जूषा

- अप्रैल मासस्य पंचदश तरिकयाम् अस्ति।,
- नहि, नहि, अहं धनुर्धरः न भो: ! अहं छात्रः खलु।,
- अहं धनुर्विद्यायाः अभ्यासं करोमि मित्र! भवान जानाति खलु मम् प्रतियोगिता अस्ति ।,
- न मित्र ! जीवानां हिंसा कदापि न उचिता अतः आखेतार्थं न गच्छामि ।
- मम हस्ते धनुः अस्ति।,

खण्ड ग

अनुप्रयुक्त व्याकरणम् (24 अंकात्मक:)

प्रश्न 05 मञ्जूषायां प्रदत्तैः अव्ययैः सहायतया वाक्यानां रिक्तस्थानानि पूरयत – 1X5=5

मञ्जूषा में दिए गए अव्ययों की सहायता से वाक्यों के रिक्त स्थानों की पूर्ति कीजिए।

Fill in the blanks with the help of indeclinable given in the box.)

(अद्य, एकदा, पुरा, सदा, एव)

(1) ——---- मम विद्यालये अवकाशः अस्ति ।

(2) --------- शिव भक्तः रावणः आसीत् ।

(3) छात्रः -------- अध्ययनं करोति ।

(4) अहं संस्कृतम ------------ पठामि ।

(5) ---------- राजा दशरथः युद्धम् अकरोत् ।

प्रश्न 06 स्थूलपदानाम् 'प्रकृतिप्रत्ययः' पृथक् संयोगाय शुद्धं उत्तरं चित्त्वा लिखत - 1X5=5

(स्थूल पदों के प्रकृति-प्रत्यय अलग व संयुक्त करके विकल्पों से शुद्ध उत्तर को चुनकर उत्तर-पुस्तिका में लिखिए।)

(Separate or join suffixes in the bold words and write answer appropriate from the options given below in the answer sheet.)

(1) छात्रः पाठं (पठ् + क्त्वा ) -------- भोजनं करोति ।

(क) पठितम्　　(ख) पठित:

(ग) पठित्य　　(घ) पठित्वा

(2) बालकः रसगोलकं (खादितुम्) ------ + ------- इच्छति ।

(क) खाद् + तुमुन्　　(ख) खाद् + ल्यप्

(ग) खाद् + तव्यत्　　(घ) खाद् + क्त

(3) सदैव ईश्वरं (संपूज्य) -------- + ------- कार्यारम्भः करणीय:।

(क) सम् + पूज्य + क्त्वा　　(ख) सम् + पूज् + ल्यप्

(ग) सम् + पूज्य + तुमुन्　　(घ) सम् + पूज् + क्तवतु

(4) उत्तमः छात्रः पाठं (पठ् + क्तवतु ) -------- ।

(क) पठितवान्　　(ख) अपठत्

(ग) पठिष्यति　　(घ) पठेत्

(5) छात्रः विद्यालयात गृहं (गम् + क्त) ----------- एषा गणना।

(क) गतवान्　　(ख) गतः

(ग) अगच्छत्　　(घ) गन्तव्य:

प्रश्न 07 शब्दरूपान् आधृत्य निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – (प्रश्नचतुष्टयम्) 1X4=4

शब्दरूप के आधार पर निर्देश के अनुसार उचित उत्तर चुनकर लिखिए (चार प्रश्न)

Choose the appropriate answer and write as per the instructions

(1) शिक्षकः छात्रं ---------- पाठयति । (पाठ –द्वितीया, एकवचनम्)

(क) पाठः　　(ख) पाठम्

(ग) पाठेन　　(घ) पाठौ

(2) अस्य विद्यालयस्य बालकः ---------- सह वार्तालापं कृतवान् । (अस्मद् –तृतीया, एकवचनम्)

(क) माम्　　(ख) मह्यं

(ग) मया　　(घ) अस्माभिः

(3) ---------- सदगुणाः सन्ति। (रमा – सप्तमी, एकवचनम्)

(क) रमाम्　　(ख) रमया

(ग) रमानाम　　(घ) रमायां

(4) जलेन ------- शोभा वर्धते । (नदी – षष्ठी, बहुवचनम्)

(क) नद्या　　(ख) नदीभ्यः

(ग) नदीभिः　　(घ) नदीनां

(5) ---------- दूरदर्शनं पश्यन्ति। (बालक – प्रथमा, बहुवचनम्)

(क) बालक:　　(ख) बालकौ

(ग) बालकं　　(घ) बालकाः

प्रश्न 08 धातुरूपानुसारं विकल्पेभ्यःउत्तरं चित्वा उत्तरपुस्तिकयां लिखत – (प्रश्नचतुष्टयम्) 1X4=4

विकल्पों में से धातु रूप के अनुसार उत्तर चुनकर रिक्तस्थान भरें और उत्तर पुस्तिका में लिखें –

Fill in the blanks by choosing the answer according to the metal form from the options and rewrite in the answer sheet -

(1) बी के बिरला सेंटर फॉर एज्युकेशन विद्यालयः पुणे नगरे -------- (अस् लट्)।

(क) अस्ति (ख) भवित

(ग) अस्मि (घ) असि

(2) त्वं कुत्र --------- (पठ् लट्)।

(क) पठति (ख) पठतः

(ग) पठथ (घ) पठसि

(3) रमेशः प्रथमपाठस्य प्रश्नोत्तराणि --------- (लिख् लोट्) ।

(क) लिखतु (ख) लिखेत्

(ग) लिखति (घ) लेखिष्यति

(4) माता भोजनं ------- (पच् लृट्)।

(क) पचसि (ख) पचति

(ग) पचिष्यतः (घ) पचिष्यति

(5) छात्राः जलम् ------ (पा लङ्)।

(क) अपिबन् (ख) पिबन्तु

(ग) पिबेयु: (घ) पिबन्ति

प्रश्न 09 निम्नलिखितानां वाक्यानाम् अनुवादं हिन्दीभाषया संस्कृतभाषया च कुरुत - 1X6=6

निम्नलिखित वाक्यों का हिन्दी तथा संस्कृत भाषा में अनुवाद कीजिए।

Translate the following sentences into Hindi and Sanskrit.

(1) भारतस्य राष्ट्रध्वजः त्रिरंगः अस्ति।

(2) छात्राः स्वच्छातायाःध्यानं कुर्वन्तु।

(3) मह्यं दुग्धं न रोचते।

(4) मैं बुखार से पीड़ित था।

(5) हमेशा सत्य बोलना चाहिए।

(6) शान्ति के सामान तप नहीं है।

पठितावाबोधनम् (31 अंकात्मकः)

प्रश्न 10 अधोलिखितं गद्यांश पठित्वा निर्देशानुसार प्रश्नान् उत्तरत-

नीचे दिए गए गद्यांश को पढ़ें और निर्देशानुसार प्रश्नों के उत्तर दें

Read the passage below and answer the questions as directed

'विश्ववन्धुत्वभावनया' युक्ता संसारस्य समस्त संस्कृतिषु भारतीया-संस्कृतिः मूर्धन्यास्ति। शिक्षायां ज्ञानविज्ञाने च भारतं सर्वदा अग्रसरं विद्यते। प्राचीनकाले नालन्दा, तक्षशिला इत्यादयः विश्वविद्यालयाः सम्पूर्णविश्वे अतीव प्रसिद्धाः आसन्। आधुनिकवैज्ञानिकयुगेऽपि चिकित्साशास्त्रे, सङ्गणकविद्यायाम्, अन्येषु च वैज्ञानिकेषु क्षेत्रेषु भारतीयाः समग्रविश्वे प्रमुखाः सन्ति। जनाः स्वहितं त्यक्त्वा देशस्य हिताय चिन्तयन्तु। स्वच्छतायाः ध्यानं कुर्वन्तु। छात्राः अपि नियमान् पालयन्तु सम्यक् अध्ययनं च कुर्वन्तु। एवं भवन्तः भारतस्य प्रगत्यां सहायकाः भविष्यन्ति। मूल्यः—वयं जागरित्वा राष्ट्रस्य प्रगत्यां सहायकाः स्याम।

(1) एकपदेन उत्तरत- (एक शब्द में उत्तर दीजिए। (केवलं प्रश्नद्वयम्) ½X2=1

(i) संसारस्य समस्त संस्कृतिषु का मूर्धन्यास्ति ?

(ii) प्राचीनकाले के विश्वविद्यालयाः प्रसिद्धाः आसन् ?

(iii) छात्राः कान् पालयन्तु ?

(2) पूर्णवाक्येन उत्तरत-(पूर्णवाक्य में उत्तर दीजिए। (प्रश्नद्वयम्) 1X2=2

(i) आधुनिकवैज्ञानिकयुगे भारतीयाः केषु क्षेत्रेषु प्रमुखाः सन्ति?

(ii) जनाः किं त्यक्त्वा देशस्य हिताय चिन्तयन्तु?

(iii) वयं कथं राष्ट्रस्य प्रगत्यां सहायकाः स्याम?

(3) निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1X2=2

(i) 'भारतं सर्वदा अग्रसरं विद्यते।' इति वाक्ये अव्ययपदं किम्?

(क) भारतम् (ख) सर्वदा
(ग) अग्रसरम् (घ) विद्यते

(ii) 'छात्राः अपि नियमान् पालयन्तु।' इति वाक्ये क्रियापदं किम्?

(क) छात्राः (ख) अपि
(ग) नियमान् (घ) पालयन्तु

(iii) 'प्राचीन' इति पदस्य विलोमपदं गद्यांशे किम् प्रयुक्तम्?

(क) समग्र (ख) आधुनिक
(ग) प्रमुख (घ) मूर्धन्य

प्रश्न 11 अधोलिखितं पद्यांश पठित्वा निर्देशानुसार प्रश्नान् उत्तरत-

नीचे दिए गए पद्यांश को पढ़ें और निर्देशानुसार प्रश्नों के उत्तर दें

Read the Phrases below and answer the questions as directed

शान्तितुल्यं तपो नास्ति, न संतोषात् परम सुखम् ।
न तृष्णायाः परो व्याधिः, न च धर्मो दयापरः ।।1।।
न कश्चित् कस्यचिन्मित्रम्, न कश्चित् कस्यचिद् रिपुः ।
व्यवहारेण जायन्ते, मित्राणि रिपवस्तथा ।।2।।

(1) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½X2=1

(i) तपः कस्मात् तुल्यं नास्ति?
(ii) परं सुखं कस्मात् भवति?
(iii) मित्राणि केन जायन्ते?

(2) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1X2=2

(i) कः परो व्याधिः न अस्ति?
(ii) कः धर्मः उच्यते?
(iii) रिपवः कथं जायन्ते?

(3) निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1X2=2

(i) 'व्यवहारेण जायन्ते मित्राणि।' इति वाक्ये क्रियापदं किम्?

(क) व्यवहारेण (ख) मित्राणि

(ग) जायन्ते (घ) तथा

(ii) 'न कश्चित् कस्यचिद् रिपुः।' इति वाक्ये अव्ययपदं किम्?

(क) नकश्चित् (ख) रिपुः

(ग) न (घ) कस्यचित् रिपुः

(iii) 'रिपुः' इति पदस्य विलोमपदं पद्यांशे किम् प्रयुक्तम्?

(क) बंधूः (ख) मित्रम्

(ग) जनः (घ) धर्मः

प्रश्न 12 अधोलिखितं नाट्यांश पठित्वा निर्देशानुसार प्रश्नान् उत्तरत-

नीचे दिए गए गद्यांश को पढ़ें और निर्देशानुसार प्रश्नों के उत्तर दें

Read the Drama below and answer the questions as directed

शिक्षकः - (छात्रान् प्रति) भवन्तः जानन्ति किम् ? अस्वस्थाः केन कारणेन भवन्ति?

गीता - महोदय ! वयं दिनचर्यायाः सम्यक् पालनं न कुर्मः। एतेन कारणेन अस्वस्थाः भवामः।

शिक्षकः - शोभनम्। अद्य अहं' दिनचर्या' इति विषये किञ्चित् वक्तुम् इच्छामि। यूयं ध्यानेन श्रृणुयात।

प्रातः उत्थाय ईश्वरं स्मृत्वा मातरं पितरं च नमेत्। तत्पश्चात् उद्यानं गत्वा भ्रमणं योगाभ्यासं चाचरेत्।

ततः गृहमागत्य स्नानं कृत्वा प्रातराशं दुग्धं च स्वीकृत्य विद्यालयं गच्छेत्।

चिरायुः - मह्यं दुग्धं न रोचते महोदय। मध्यं प्रातराशे 'बर्गर चाऊमीन मोमो पिज्जा शीतपेय-ब्रेड' इत्यादीनि रोचन्ते।

शिक्षकः - ईदृशं भोजनं स्वास्थ्याय हानिकारकं भवति। सदैव स्वास्थ्य वर्धकानि खाद्यानि एव खादेयुः। ततः मध्याहने गृहम् आगत्य गृहे पक्वं शुद्धभोजनं गृहीत्वा विश्रामं कुर्युः।

लता - ततः ?

शिक्षकः - सायंकाले क्रीडित्वा गृहमागत्य गृहकार्य स्वाध्यायं च कुर्युः।

पवनः - महोदय। जीवने अनुशासनस्य किं महत्त्वम्?

शिक्षकः - अनुशासनं जीवने अनिवार्यम् अस्ति। अनुशासनबद्धम् जीवनं सर्वत्र प्रशंसनीयं भवति। नियमान् कदापि मा भिन्देयुः।

(1) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½X2=1

(i) शिक्षकः कस्मिन् विषये वक्तुम् इच्छति?

(ii) चिरायुषे किं न रोचते?

(iii) जीवने किम् अनिवार्यम् अस्ति?

(2) एकवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 1X2=2

(i) गीता अस्वस्थतायाः कारणं किम् कथयति?

(ii) शिक्षकः प्रातःकाले किं कर्तुम् उपदिशति?

(iii) शिक्षकः स्वास्थ्यवर्धकभोजनस्य विषये किं कथयति?

(3) निर्देशानुसारम् उत्तरत (केवलं प्रश्नद्वयम्) 1X2=2

(i) 'ततः गृहमागत्य स्नानं कृत्वा विद्यालयं गच्छेत्।' इति वाक्ये अव्ययपदं किम्?

(क) गृहमागत्य (ख) ततः

(ग) स्नानम् (घ) गच्छेत्

(ii) 'अनुशासनं जीवने अनिवार्यम् अस्ति।' इति वाक्ये क्रियापदं किम्?

(क) अनुशासनम् (ख) जीवने

(ग) अनिवार्यम् (घ) अस्ति

(iii) 'हानिकारकम्' इति पदस्य विलोमपदं संवादे किम् प्रयुक्तम्?

(क) अनुशासनम् (ख) स्वास्थ्यवर्धकानि

(ग) शुद्धभोजनम् (घ) प्रातराशम्

प्रश्न 13 अधोलिखित वाक्येषु रेखांकित पदम् आधृत्य प्रश्ननिर्माणं कुरुत – 1X5=5

नीचे दिए गए वाक्यों में रेखांकित पद के आधार पर प्रश्न निर्माण कीजिए

Construct a question based on the underlined term in the sentences below

(1) वयं <u>भारतस्य</u> विषये पठितुम् इच्छामः ।

(2) सदैव स्वास्थ्य <u>वर्धकानि खाद्यानि</u> एव खादेयुः।

(3) निम्नजना: <u>विघ्नभ्येन</u> कार्यारम्भं न कुर्वन्ति ।

(4) <u>संतोषात्</u> परं सुखम् नास्ति

(5) चिरायु: <u>चलचित्रं</u> पश्यति ।

प्रश्न 14 अधोलिखितश्लोकांशान् यथायोग्यं मेलयत – 1X4=4

नीचे दिए गए श्लोकों का उचित मिलान कीजिए

Match the verses given below appropriately

| क | ख |
|---|---|
| शोको नाशयते धैर्यं, | रक्तश्चास्तं गते यथा |
| शोको नाशयते सर्वं, | शोको नाशयते श्रुतम् |
| सम्पत्तौ च विपत्तौ च | विघ्नभयेन नीचैः, |
| प्रारभ्यते न खलु | नास्ति शोकसमो रिपुः |
| उदये सविता रक्तो, | महतामेकरूपता |

प्रश्न 15 मंजूषातः समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयित्वा पुनः लिखत - ½X4=2

मंजूषा से उचित शब्द चुनकर निम्नलिखित श्लोक के अन्वय को भरकर पुनः लिखें

Choose the appropriate word from the box and fill in the context of the following verse and rewrite it.

शोको नाशयते धैर्यं शोको नाशयते श्रुतम्
शोको नाशयते सर्वं नास्ति शोकसमो रिपु: ।।

अन्वयः – शोको (1) ----- नाशयते। (2) ----- श्रुतम् नाशयते। शोको सर्वं (3) --------- । शोकसमो (4) ----- नास्ति।

मंजूषा

शोको, धैर्यं, रिपु:, नाशयते

अथवा

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्
मूढैः पाषाण खण्डेषु रत्नसंज्ञा विधीयते ।।

अन्वयः - (1) ---------- त्रीणि रत्नानि (2) -----------। जलम् अन्नं तथा च (3) ----------, किन्तु मूढैः पाषाणखण्डेषु (4) ---------- विधीयते।

मंजूषा

रत्नसंज्ञा, सुभाषितम्, पृथिव्यां, सन्ति

प्रश्न 16 अधोलिखितकथां मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयित्वा पुनः लिखत- ½X10=5

मञ्जूषा में दिए गए शब्दों से रिक्त स्थान भरकर नीचे दी गई कहानी को पुनः लिखिए -

Rewrite the story below by filling in the blanks with the words given in the box:

एकस्मिन् ग्रामे जगत्पालो नाम एकः सज्जनो वसति। तस्य पत्नी कला अस्ति। तौ दम्पती सुखेन निवसतः। तयोः द्वे सन्तती स्तः, एकः तनयः एका च तनया। तनयस्य नाम विवेकः, तनयायाश्च नाम प्रतिभा अस्ति। विवेकः सप्तमकक्षायां पठति, प्रतिभा च तृतीयकक्षायाम्।

जगत्पालः एकः (1) -------- कुशलश्च कृषकः अस्ति। सः सर्वदा (2) -------- संलग्नः स्वकर्तव्यं पालयति। सः परिश्रमं कृत्वा स्वक्षेत्रे पर्याप्तम् (3) -------- , शाकं, फलं च उत्पादयति। तस्य गृहे एका श्वेतवर्णा (4) -------- वर्तते। सा बहु दुग्धं ददाति।

विवेकः प्रतिभा च स्वास्थ्यपुष्टिभोजनं कुरुतः। तौ शाकं फलं चाधिक्येन खादतः। तौ विद्यालयं प्रति गच्छतः। विद्यालयतः आगत्य (5) -------- कुरुतः। तत्पश्चात् सायं स्वमित्रैः सह क्रीडतः।

कला एका आदर्शभूता च (6) -------- अस्ति। सा सदा स्वकार्याणि सम्पादयति, पत्युः सन्तानयोः स्वास्थ्यविषये (7) ------- च वर्तते। पतिः जगत्पालोऽपि स्वपत्नी (8) ------ बहु मन्यते। अनेन प्रकारेण परस्परं स्नेह-सौहार्द-बद्धः अयं लघुपरिवारः एकः (9) -------- अस्ति। लघुपरिवारः एकः सुखी (10) -------- ।

मंजूषा

सावधाना, आदर्शपरिवारः, कलां, गृहिणी, उद्योगी, धेनुः, परिवारः, कृषिकर्मणि, स्वगृहकार्यं, अन्नम्

========================== इत्यलम् ==========================